# Sri Guru Stotram composed by Acharya Bhaskararaya

जय नाथ जय नाथ जय सद्गुरुमूर्ते ।
हर मम मतिमिह वार्ते परिहृतभवजूर्ते ॥

उन्मन्या अपि परतो निवसस्यतिकूटे
दशशतदल-सरसीरुह-शशिमयकरहाटे ।
अकथादिक-रेखात्रिक-कलिते शृङ्गाटे
अन्तःकोणत्रयगत-ळक्षहमयपीठे ॥

जय नाथ जय नाथ जय सद्गुरुमूर्ते ।
हर मम मतिमिह वार्ते परिहृतभवजूर्ते ॥

नाथ वराभयमुद्रा-वितरण-कलितकरा
न भवति देवाऽन्तरवन्मम देवी त्रिपुरा ।
तन्मुद्रे तदभिन्ने त्वयि सति किमिति परा
तस्माद्देशिकवर मयि कथमिव जन्मजरा ॥

जय नाथ जय नाथ जय सद्गुरुमूर्ते ।
हर मम मतिमिह वार्ते परिहृतभवजूर्ते ॥

तव पादाम्बुजमध्वास्वादनतो बुद्ध्वा
योनेर्मुद्रां बद्ध्वा पवनावपि रुद्ध्वा ।

अहमभवं शिवबद्ध्वावेशोऽत्थ-षडध्वाऽऽ
मर्शत्यक्तकदद्ध्वा भास्करसहयुद्ध्वा ॥

जय नाथ जय नाथ जय सद्गुरुमूर्ते ।
हर मम मतिमिह वार्ते परिहृतभवजूर्ते ॥

jaya nātha jaya nātha jaya sadgurumūrte |
hara mama matimiha vārte parihṛtabhavajūrte ||

unmanyā api parato nivasasyatikūṭe
daśaśatadala-sarasīruha-śaśimayakarahāṭe |
akathādika-rekhātrika-kalite śṛṅgāṭe
antaḥkoṇatrayagata-ldakṣahamayapīṭhe ||

jaya nātha jaya nātha jaya sadgurumūrte |
hara mama matimiha vārte parihṛtabhavajūrte ||

nātha varābhayamudrā-vitaraṇa-kalitakarā
na bhavati devā.antaravanmama devī tripurā |
tanmudre tadabhinne tvayi sati kimiti parā
tasmāddeśikavara mayi kathamiva janmajarā ||

jaya nātha jaya nātha jaya sadgurumūrte |
hara mama matimiha vārte parihṛtabhavajūrte ||

tava pādāmbujamadhvāsvādanato buddhvā
yonermudrāṃ baddhvā pavanāvapi ruddhvā |
ahamabhavaṃ śivabaddhvāveśo.attha-ṣaḍadhvā.a.a
marśatyaktakadaddhvā bhāskarasahayuddhvā ||

jaya nātha jaya nātha jaya sadgurumūrte ।
hara mama matimiha vārte parihṛtabhavajūrte ॥

www.kamakotimandali.com